# भुवनेश्वरी सहस्त्रनाम स्तोत्रम्

श्रीपार्वत्युवाच-

देव देव महादेव सर्वशास्त्रविशारद ।
कपालखट्वाङ्गधर चित्रभस्माङ्गलेपन ॥1॥
या आद्या प्रकृतिर्नित्या सर्वशास्त्रेषु गोपिता ।
तस्याः श्रीभुवनेश्वर्या नामाष्टकसहस्त्रकम् ॥2॥
कथयस्व महादेव येन देवी प्रसीदति ।

श्रीमहेश्वर उवाच

साधु पुष्टं महादेवि साधु लोकहिताय च ॥3॥
या आद्या प्रकृतिर्नित्या सर्वशास्त्रेयु गोपिता ।
यस्याः स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥4॥
आराधनाद्भवेद्यस्या जीवन्मुक्तो न संशयः ।
तस्या नामसहस्त्राणि कथयामि शृणुष्व तत् ॥5॥

अस्य श्रीभुवनेश्वरी नाम स्तोत्रस्य दक्षिणामूर्ति ऋषिः पंक्तिर्विराट् छन्द आद्या भुवनेश्वरी देवता मम धर्मार्थकाममोक्षार्थ विनियोगः ।

ॐ आद्या कमला वाणी माया श्रीभुवनेश्वरी ।
भुवना भावना भव्या भवानी भवमोचनी ॥6॥
रुद्राणी रुद्रभक्ता च तथा रुद्रप्रिया सती ।
उमा कामेश्वरी दुर्गा सर्वाणी सर्वमंगला ॥7॥
त्रिपुरा परमेशानी सुन्दरी सुन्दरप्रिया ।
रमणी रमणा रामा कामकार्यकरी शुभा ॥8॥
ब्राह्मी नारायणी चण्डा चामुण्डा चण्डनायिका ।
माहेश्वरी च कौमारी वाराही चापराजिता ॥9॥
महामाया मुक्तकेशी महात्रिपुरसुन्दरी ।
सुन्दरी शोभना रक्ता रक्तवस्त्रपिधायिनी ॥10॥
रक्ताभा रक्तवर्णा च रक्तबीजनिसूदिनी ।
रक्तचन्दनलिप्ताङ्गी रक्तपुष्पप्रिया सदा ॥11॥
लक्ष्मीर्लोलाञ्चला चञ्चलाक्षी च चपलप्रिया ।
भैरवी भयकर्त्री च महाभयप्रदायिनी ॥12॥
भयङ्करी महाभीमा भयदा भयनाशिनी ।
श्मशाने प्रान्तरे दुर्गे संस्थिता भयवर्द्धिनी ॥13॥
जया च विजया चैव जयपूर्वा जयप्रदा ।
यमुना यामुना याम्या यमश्रेष्ठा यमप्रिया ॥14॥
सर्वेशी जनिका जन्या जयवर्द्धनकारिणी ।
काली कपालिनी कुल्या कालिका कालरात्रिका ॥15॥
महाकालहृदिस्था च कालभैरवरूपिणी ।
कपालखट्वाङ्गधरा पाशांकुशविधारिणी ॥16॥
अभया च भया चैव तथा चाभयदायिनी ।
महामाया भीमवेगा महावेगा महास्तनी ॥17॥
गौरी गौराङ्गका गौरा गौरवर्णा जयप्रदा ।
उग्रा उग्रप्रभा शान्ता शान्तिदा शान्तिदायिनी ॥18॥
उग्रतारा तथा चोग्रा नीला चैकजटा तथा ।
हंसरूपा महातारा तथा च सिद्धिकालिका ॥19॥

तारा नीला च वागीशी तथा नीलसरस्वती ।
गङ्गा काशी सती सत्या सर्वतीर्थमयी तथा ॥
तीर्थपुण्यानार्थरूपा तीर्थदा तीर्थसेविका ॥20॥

पुण्यापुण्यस्वरूपा च पुण्यदात्री सनातनी ।
पुण्यकान्ता पुण्यसंस्था तथा पुण्यजनप्रिया ।।21।।
तुलसी तुलना तुल्या बालिका वेधसः प्रिया ।
सत्य सत्यवती भीमा रुक्मिणी कृष्णवल्लभा ।।22।।
देवकी कृष्णमाता च सुभद्रा भद्ररूपिणी ।
मनोहरा तथा सौम्या सोमांगी सोमदर्शना ।।23।।
कुमारी बालिका क्षुद्रा कुमारीरूपधारिणी ।
युवती युवतीरूपा सुवतीरसरञ्जिका ।।24।।
पीनस्तनी क्षीणमध्या प्रौढ़ा च जनवल्लभा ।
अतिवृद्धा स्थाणुरूपा चार्वङ्गी चञ्चलानना ।।25।।
देवमाता देवरूपा देवकार्यकरी शुभा ।
देवमाता देवदीक्षा सर्वमाता सनातनी ।।26।।
प्राणप्रिया पालिनी च चपला पललप्रिया ।
मत्स्यमांसप्रिया मांसाशिनी च जनवल्लभा ।।27।।
तपस्विनी तपी तप्या तपःसिद्धिप्रदायिनी ।
हविष्याशी हविर्भोक्ती हव्यकव्यविलासिनी ।।28।।
स्वधा स्वाहा स्वधाधारा यज्ञाङ्गी यज्ञभुक् सदा ।
दक्षा दाक्षायणी दुर्गा दक्षयज्ञविनाशिनी ।।29।।
पार्वती पर्वतप्रीता तथा पर्वतवासिनी ।
हैमी हैमा हेमरूपा मौलिमान्या मनोरमा ।।30।।
कैलासवासिनी शुक्ला शिवक्रोडनिवासिनी ।
चार्वगी चारुरूपा च शुभा चैव शुभानना ।।31।।
चलत्कुण्डलगण्डा च लौहकुण्डलधारिणी ।
हेमसिंहोपरिस्था च हेमभूषणभूषणा ।।32।।
हेमाङ्गदा हेमभूषा सूर्यकोटिसमप्रभा ।
तरुणादित्यसङ्काशा सिन्दूरार्चितविग्रहा ।।33।।
यवा यावकरूपा च रक्तचन्दनरूपधृक् ।
कोटरी कोटराक्षी च निर्लज्जा च दिगम्बरी ।।34।।
पूतना वत्समाता च सूर्यमण्डलवासिनी ।
श्मशानवासिनी शून्या हस्तचत्वरवासिनी ।।35।।
मधुकैटभसंहर्त्री महिषासुरघातिनी ।
निशुम्भशुम्भशमनी चण्डमुण्डविनाशिनी ।।36।।
शिवानी शिवरूपा च शिवदूती शिवप्रिया ।
शिवदा शिववक्षस्था शिवेष्टा शिवकारिणी ।।37।।
इन्द्राणी इन्द्रकन्या च राजकन्या सुरप्रिया ।
लज्जाशीला साधुशीला कुलस्त्री कुलपूजिता ।।38।।
महाकुलीना निष्कामा विलज्जा भूषणन्विता ।
कुलीना कुलकन्या सा तथैव कुलभूषिता ।।39।।
अनन्तानन्तपाणिकाऽनन्तासुरविनाशिनी ।
सदाशिवसुसङ्गेन राजिताऽऽनन्ददायिनी ।।40।।
नागांगी नागभूषा च नागहारविधायिनी ।
धरणी धारिणी माया महासिद्धिप्रदायिनी ।।41।।
भूतप्रेतपिशाचा च राकिनी लाकिनी तथा ।
भूतप्रेतपिशाचानां वलदा यक्षिणी शिवा ।।42।।
धृतिः कीर्तिः स्मृतिर्मेधा पुष्टिस्तुष्टिरुमा उषा ।
शङ्करी शाम्भवी मेना रतिः प्रीतिः सुलोचना ।।43।।
अनङ्गमदना देवी अनंगमदनाऽऽतुरा ।
भुवनेशी महामाया तथा भुवनपालिनी ।।44।।
ईश्वरी ईश्वरप्रीता चन्द्रशेखरभूषिता ।
चित्तानन्दकरी नन्दा चित्तसंस्था चितायुता ।।45।।
स्वरूपा सर्वरूपा च ब्रह्मरूपा चिदात्मिका ।
आनन्दरूपिणी नित्या तथाऽऽनन्दप्रदायिनी ।।46।।
त्वरिता तरुणा भव्या भाविका च विभाविनी ।
चन्द्रसूर्यसमा दीप्ता चन्द्रसूर्यस्य पालिका ।।47।।
नारसिंही हंसग्रीवा हिरण्याक्षविनाशिनी ।
वैष्णवी विष्णुभक्ता च शालग्रामनिवासिनी ।।48।।
चतुर्भुजा चाष्टभुजा सहस्त्रभुजसंज्ञिता ।
आद्या कात्यायनी नित्या सर्वाद्या सर्वदायिका ।।49।।
सर्वमन्त्रमयी देवी सर्वलोकमयी तथा ।
सर्वसम्मोहनी देवी सर्वलोकवशङ्करी ।।50।।
रंजिनी रञ्जिता रागा देहलावण्यरञ्जिता ।
घटी नटी प्रिया धूर्ता तथा धूर्त्तजनप्रिया ।।51।।
महामाया महामोहा महासत्वविमोहिता ।
वलिप्रिया मांसरुचिर्मधुमांसप्रिया तथा ।।52।।
मधुमत्ता माधविका मधुमाधवरूपिका ।
दिवामयी रात्रिमयी सन्ध्या सन्ध्यास्वरूपिणी ।।53।।
कामरूपा सूक्ष्मरूपा सुक्ष्मिणी सूक्ष्मरूपिणी ।
तिथिरूपस्वरूपा च तथा वासर – रूपिणी ।।54।।
सर्वभूतमयी देवी पञ्चभूतनिवासिनी ।
ग्रहाणां स्थितिरूपा च इन्द्रादीनां च सम्भवा ।।55।।
ऋषीणां ब्रह्मपुत्राणां तपःसिद्धिप्रदायिनी ।
शवस्था शवरूपा च शवसङ्गकुतूहला ।।56।।
योगिनी योगरूपा च योगीन्द्रस्वान्तहारिणी ।
सुप्रसन्ना महादेवी यामिनो भुक्तिदायिनी ।।57।।
महामाया विष्णुमाया मोहिनी सुरमोहिनी ।
कार्यसिद्धिकरी देवी सर्वकार्यनिवासिनी ।।58।।
कार्याकार्यकरी रौन्द्री महाप्रलयकारिणी ।
स्त्री पुम्भेदा अभेदा च भेदिनी भयनाशिनी ।।59।।
सुप्रशस्तो समस्ता च छिन्नमस्ता सुनासिका ।
त्रिरूपा विश्वरूपा च चित्तरूपा चिदात्मिका ।।60।।
बहुशास्त्रा अशास्त्रा च सर्वशास्त्रप्रहारिणी ।
शास्त्रा शास्त्रविवादे च नानाशास्त्रार्थवादिनी ।।61।।
काव्यशास्त्रप्रमोदा च काव्यालङ्कारवासिनी ।
रसज्ञा रसना जिह्वा रसनाग्रया रसप्रदा ।।62।।
नानाकौतुकसंयुक्ता नानारसनिवासिनी ।
अरूपा च स्वरूपा च विश्वरूपा च रूपिणी ।।63।।
रूपा जीवा तथा वेश्या वेश्याद्या वेशधारिणी ।
नानावेशधरा देवी नानावेशेषु संस्थिता ।।64।।
कुरुपा कुस्थिता कृष्ण कृष्णरूपा च कालिका ।
लक्ष्मीप्रदा महालक्ष्मीः सर्वलक्षणसंयुता ।।65।।
कुबेरगृहसंस्थाना धनरूपा धनप्रदा ।
नानारूपप्रदा देवी रत्नपुष्पेषु संस्थिता ।।66।।
वर्णस्था वर्णरूपा च सर्ववर्णमयी तथा ।
ॐकार रूपिणी आद्या आस्तिस्था ज्योतिरूपिणी ।।67।।
संसारमोहिनी देवी संसारजयदायिनी ।
जयस्वरूपा जयदा जयिनी जयकारिणी ।।68।।
मान्या मानप्रिया मान्य-मानिनीनां महोदया ।।69।।
साधका साधिका साध्या साधना साधनप्रिया ।
स्थावरा जङ्गमा सूक्ष्मा चपला चपलप्रिया ।।70।।
ऋद्धिदा वृद्धिरूपा च सिद्धिदा सिद्धिरूपिणी ।
क्षेमंकरी शङ्करी च सर्वसम्मोहकारिणी ।।71।।
वाञ्छिता वाञ्छनीया च सर्ववाञ्छाप्रदायिनी ।
भगलिङ्गप्रमोदा च भगलिङ्गप्रदायिनी ।।

भगरूपा भगाभोग्या लिङ्गरूपा च लिङ्गिनी ।
भगगीतिर्महाप्रीति लिङ्गनीतिसुखावहा ।।73।।
स्वयंभूपुण्यरूपा च स्वयंभूकुसुमप्रिया ।।74।।
शुक्लरूपा महाशुक्ला शुक्लसिन्धुनिवासिनी ।
अक्षमालाधरा देवी पानद्रव्यविधायिनी ।।75।।
शूलहस्ता चक्रहस्ता पाशिनी पाशरूपिणी ।
खड्गिनी गदिनी चैव तथा सर्वास्त्रधारिणी ।।76।।
भाव्या भव्या भवानीया भवभुक्तिप्रदायिनी ।
चतुरा चतुरप्रीता चतुराननपूजिता ।।77।।
देवस्तव्या देवपूज्या सर्वपूज्या सुरेश्वरी ।
जननी जनपुण्या च जनमानसचारिणी ।।78।।
जटिनी केशबन्धा च सुकेशी केशवासिका ।
अहिंसा वेशिका वेश्या सर्वविद्विट्विनाशिनी ।।79।।
उच्चाटिनी स्तम्भिनी च मोहिनी मधुरेक्षणा ।
क्रीडाव्रीडावती लेखा करुणा करुणाकरी ।।80।।
सर्वज्ञा सर्वगम्या च सर्वभक्षा सुरारिहा ।
सर्वरूपा सर्वशास्त्री सर्वेषां प्राणधारिणी ।।81।।
सृष्टिस्थितिकरी देवी तथा प्रलयकारिणी ।
सर्वतत्वात्मिका गौरी नानामूर्तिविधारिणी ।।82।।
भक्तानि यानि देनेश्रुक्तानि च महेश्वरि ।
यत्किञ्चिदूहश्यते देवि तत्सर्वं भुवनेश्वरी ।।83।।
इति श्रीभुवनेश्वर्या नामान्युक्तानि ते प्रिये ।
सहस्राणि महादेवि फलमेषां निगद्यते ।।84।।

फलश्रुति ।

यः पठेत् प्रातरुत्थाय अर्द्धरात्री तथा परे ।
प्रातःकाले तथा मध्ये सायाह्ने हरवल्लभे ।।85।।
यथाकाले यथास्थाने तस्य सिद्धिर्न संशयः ।
यः पठेत् पाठयेद्वापि शृणुयाद्ध्यायते तथा ।।86।।
तस्य सर्वं भवेत् सत्यं मनसा यच्च वाञ्छितं ।
अष्टम्यां च चतुर्दश्यां नवम्यां च विशेषतः ।।87।।
कुहूमङ्गलसंयुक्तं संक्रांत्यां शनिभौमयोः ।
यः पठेत् पाठयेद्भक्त्या देव्या नामसहस्रकम् ।।88।।
तस्य देहे च संस्थानं कुरुते भुवनेश्वरी ।
तस्य सर्वं भवेद्देवि अन्यथा न कदाचन ।।89।।
श्मशाने प्रान्तरे वापि शून्यागारे च पार्वति ।
चतुष्पथे चैकलिङ्गे जलमध्ये विशेषतः ।।90।।
रणमध्ये च संग्रामे तथा प्राणस्य संशये ।
जप्त्वा मन्त्र सहस्रन्तु पठेन्नामसहस्रकम् ।।91।।
तस्य तुष्टा भवेद्देवि सर्वदा भुवनेश्वरी ।
धूपदीपादिभिश्चैव बलिदानादिभिस्तथा ।।92।।
दत्वा नानाविधैर्देवि नैवेद्यैर्भुवनेश्वरीम् ।
संपूज्य विधिवज्जप्त्वा स्तुत्वा नामसहस्रकैः ।।93।।
अचिरात् सिद्धिमाप्नोति साधको नात्र संशयः ।
भूर्जपत्रे समालिख्य कुंकुमारक्तचन्दनैः ।।94।।
तथा गोरोचनाभिश्च विलिखेत्साधकोत्तमः ।
सुतिथौ शुभनक्षत्रे लिखित्वा दक्षिणे भुजे ।।95।।
धारयेत्परया भक्त्या देवीरूपेण पार्वति ।
तस्य सिद्धिर्महादेवि अचिराद्धि भविष्यति ।।96।।
रणे राजकुले द्यूते सर्वत्र विजयी भवेत् ।
देवाः सर्वे वशं यान्ति किं पुनःमानवादयः ।।97।।
वाय्वादीनां गतिस्तम्भं करोत्येव न संशयः ।
पठेद्वा धारयेद्वापि देवीबुद्ध्या च पार्वति ।।98।।

इह भुक्त्वा वरान् भोगान्
कृत्वा काव्यान् सुविस्तरान् ।
अन्ते देव्या गणत्वं च
साधको मुक्तिमाप्नुयात् ।।99।।
प्राप्नोति देवदेवेशि सर्वदा नात्र संशयः ।
न्यूनाङ्गे चातिरिक्ताङ्गे शठाय परशिष्यके ।।100।।
न दातव्यं महादेवि प्राणान्तेपि कदाचन ।
शिष्याय भक्तियुक्ताय विनीताय महेश्वरि ।।101।।
दातव्यं स्तवराजञ्च सर्वसिद्धिं समायुतम् ।
य इदं भुवनेश्वर्य्याः स्तवराजं महेश्वरि ।।102।।
लिखित्वा धारयेद्देहे तस्य विघ्नो न जायते ।
इति प्रकथितमेतद्देवि ! नाम्नां सहस्रं,
सुरतरुमिव कान्तं सिद्धिसंघैकसेव्यम् ।
यदि पठति मनुष्यो नान्यचेताः सदैव,
व्रजति तव समीपं लोकसंस्तूयमानः ।।103।।

।। इति श्रीरुद्रयामले भुवनेश्वरीसहस्रनाम स्तोत्रम् ।।

